22E
100 Marks

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत पारंगत (एम.ए.) बहि:स्थ**

**परीक्षा: जानेवारी – २०२३**

**सत्र १ ले**

**विषय: सामान्य व्याकरण (22E311)**

---

**दिनांक: ०३/०१/२०२३** **गुण : १००** **वेळ : स. १०.०० ते १.००**

---

**सूचना:** १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

**प्र. १. विषयमेकमधिकृत्य निबन्धो लेख्यः।** (२०)

अ. संस्कृतस्यावश्यकता। ब. गुणाः सर्वत्र पूज्यन्ते। क. व्यायामगौरवम्।

**प्र. २. द्वयोः माध्यमभाषया अनुवादं करुत।** (१०)

अ. अतः अस्माभिः पूर्णकर्तव्यनिष्ठया कार्यं करणीयम्, तेन एव राष्ट्रस्य प्रगतिः भविष्यति यथा कर्म तथा फलम्। मणिलालः हसन् वदति– एकदा केचन जनाः नौकया गङ्गानदीं तरन्ति स्म। तेषु एकः पण्डितः आसीत्। सः तस्य पाण्डित्यं कथयति स्म। स्वस्य सहप्रयाणिकानां समीपे सः वेदान्, वेदान्तं, दर्शनानि पठितवान् अस्ति इति उक्तवान्। अनन्तरमेकँ सहप्रयाणिकँ पृष्टवान्– तव वेदान्तस्य परिचयः जातः? सहप्रयाणिकः नम्रतया न स्वामिन्निति अवदत्। पण्डितेन पृष्टमपि शास्त्राणि पठितानि। तेन पुनः सविनयं नेत्युक्तम्। पण्डितस्यास्य गर्वस्य वचनमग्रे सरदासीत्।

आ. प्रोक्तवान् मां तत्रभवान्, ‘‘जीवनस्य विविधान् विषयान् प्रति कथं व्यवहर्तव्यं कथं वा ते स्वीकरणीयाः इत्यस्मिन् विषये नितराम् आवश्यकः आत्मविश्वासः अध्यापकैः स्वकर्तव्यमिति मत्वा छात्रेषु निर्मातव्यः। प्रतिक्षणं विविधाः खलु समरप्रसङ्गाः मनुजजीवने। आत्मनोऽपि श्रेष्ठतराणां छात्राणां निर्माणम् इत्येव परमोच्चम् आयुषः आनन्दनिधानं गुरोः कृते। शिष्याद् इच्छेत् पराजयम्, शिष्यप्रकर्षो यशसे गुरूणाम् इति विविधाः उक्तयः सुप्रसिद्धाः एव कर्तव्यं मे। कृतं साधु। सम्प्रति मम छात्राः तथा ख्यातकीर्तयः यथा तेषाम् आचार्यत्वेन मे परिचयः प्रतीतिः वा मम कृते नूनम् अभिमानास्पदम् आनन्दहेतुश्च।’’

इ. नियोजितसमयपूर्वं हि अहं तत्र आगता आसम्। शालायाःप्रमुखाध्यापिका आगत्य क्षमां प्रार्थयत। सा आसीत् प्रौढा शारीरप्रकृत्या तु सुदृढा। सा अनुशासनप्रिया स्यात् इति मम तर्कः। परं बहुवारं प्रथमदर्शनं विसंवदति आचरणेन। सा अवदत्, ‘‘अद्य दिनान्तं यावत् कार्यक्रमः वर्तते भृशं कार्यव्यापृता भवेयम्।’’ संभाषणानन्तरं मया दृष्टं यत् शालायाः परिसरे एकस्मिन् कोणे एकः वास्तुः आसीत। तस्य पुरतः कानिचित् वस्त्राणि, शाटिकादीनि शुष्कीकरणार्थं स्थापितानि आसन्। अहमपि शिक्षिका अस्मि। शिक्षकः वक्तुं प्रारभते चेद् बहु वक्ति। अतः मध्ये एव तां विरमय्य मया पृष्टं, ‘‘तत्र शुष्कीकरणाय विहितानि वस्त्राणि दृश्यन्ते, केचित् निवसन्ति किं तत्र?’’ मम प्रश्नेन प्रमुखाध्यापिका विचलिता उक्तवती च ‘‘आपत्प्रसङ्गे निवासः इत्यनेन कारणेन स वास्तुः स्थापितः।’’ ‘‘किन्तु शालायाः परिसरे किमर्थम्?’’ ‘‘भवदीयशालासु यथा तथैव। केवलम् आपदि एव निवासः अन्यथा तत्र कक्षाः प्रचलन्ति।’’ तर्हि अधुना का आपद् आगता?

**प्र. ३. द्वयोः अन्वयं लिखित्वा माध्यमभाषया अनुवादं कुरुत ।** (१६)

अ. धवलयति समग्रं चन्द्रमाः जीवलोकं किमिति निजकलङ्कं नात्मसंस्थं प्रमार्ष्टि।
भवति विदितमेतत् प्रायशः सज्जनानां परहितनिरतानामादरो नात्मकार्ये।।

आ. हे हेमकार परदु:खविचारमूढ किं मां मुहु:क्षिपसि वारशतानि वह्नौ।
संदीप्यते मयि सुवर्णगुणातिरेक: लाभः परं तव मुखे खलु भस्मपातः।।

इ. उदयति यदि भानुः पश्चिमे दिग्विभागे प्रचलति यदि मेरुः शीततां याति वह्निः।
विकसति यदि पद्मं पर्वताग्रे शिलायां न चलति खलु वाक्यं सज्जनानां कदाचित्।।

**प्र.४. संस्कृतभाषया अनुवदत।** (१०)

१. एका बैलाने उंदराच्या शेपटीवर पाय ठेवला.

२. त्याच्या मोठ्या बहिणीने लेख लिहिला.

३. सिंह पशूंचा राजा आहे.

४. तू बातमी वाचलीस का?

५. पक्षी झाडाच्या फांदीवर घरटे बांधतो.

६. सगळे लोक जेव्हा जातात तेव्हा तो खोली स्वच्छ करतो.

७. घनदाट अरण्यात मी वाघ पाहिला.

८. जर पाऊस पडला तर मी शाळेत जाणार नाही.

९. ठराविक वेळेत व्यायामही करायला हवा.ससा वेगाने धावेल.

१०. धैर्य माणसाचे भूषण आहे.

**प्र. ५. चतुर्णां नामनिर्देशपूर्वकंसमासविग्रहं कुरुत।** **(०४)**

अ. महीपालः आ. त्यक्तशस्त्रः इ. प्रथितयशः ई. युकालिक्षम् उ. राजदण्डभयात्

**प्र. ६. पञ्चानां वाच्यपरिवर्तनं कुरुत।** **(०५)**

१. तेन भूमौ पत्यते। २. त्वं माम् कथयसि।

३. देवराजेन सा वीरकन्या आहूता। ४. महिलाः नूतनाः शाटिकाः क्रीणन्ति।

५. कार्येऽस्मिन् तौ साहाय्यमकुरुताम्। ६. जनैः सर्वैः सह स्नेहेन आचरणीयम्।

**प्र. ७. दशानां रूपपरिचयं कुरुत।** **(१०)**

१. अर्चित्वा २. मनांसि ३. एषिष्यति ४. इमे

५. गर्जितवान् ६. त्वा ७. कम्पताम् ८. अस्मासु

९. विकस्य १०. तेभ्यः ११. नष्टौ

**प्र. ८. सन्धीन् कुरुत विघटयत वा। (केवलं ५ )** **(०५)**

१. द्वाविमौ २. रवी राजते ३. निसर्गाल्लभ्यते

४. गच्छन्+तिष्ठति ५. सम्यगुक्तम् ६. वाक्+हरिः

**प्र. ९. सूचनानुसारं कृतीः कुरुत। (केवलं १५ )** **(१५)**

१. सः पत्रकाणि वितरति। (लङ्लकारे परिवर्तयत।)

२. देवः प्रकट्य आशीर्वचनमुवाच। ('च' इति अव्ययं योजयत।)

३. वयं ----- विरमामः। (भाषण इति पदस्य योग्यं रूपं लिखत।)

४. असत्यवचनं त्वं मा -----। (वद् धातोः योग्यरूपं लिखत।)

५. आचार्यः शिष्यम् आदिष्टवान्। (बहुवचने परिवर्तयत।)

६. आयुर्वेदमनुसृत्य मानवशरीरे ----- दोषाः वर्तन्ते। (त्रि इति सङ्ख्यावाचकस्य योग्यं पदं लिखत।)

७. माता ----- स्निह्यति। (पुत्री इति पदस्य योग्यरूपं लिखत।)

८. न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे (सति सप्तमी रचनां निष्कासयत।)

९. गुरुः शिष्यम् उपदिशति। (लिङ् लकारे परिवर्तयत।)

१०. मृगः तं दृष्ट्वा अब्रवीत्। (पूर्वकालवाचकं निष्कासयत।)

११. वयम् आनन्देन निवसामः। (लट् स्थाने लङ् लिखत।)

१२. ----- वस्त्राणि ददातु। (रजक इति पदस्य योग्यरूपं लिखत।)

१३. यदा श्रेष्ठी गतः तदा ज्येष्ठा वधूरचिन्तयत्। (सति सप्तमी रचनां कुरुत।)

१४. ----- समो दाता न भूतो भविष्यति। (कृपण इति पदस्य योग्यरूपं लिखत।)

१५. त्वं चिन्तां मा -----। (कृ धातोः योग्यरूपं लिखत।)

१६. गर्दभः भारं नयति (भृत्यः इति कर्तृपदं योजयत)

**प्र. १०. रूपाणि लिखत। (केवलं ५ )** **(०५)**

१. हेत्वर्थक-अव्ययम् आ+ह्वे २. धा - लट् प्रथमपुरुषः बहुवचनम्

३. लिङ् मध्यमपुरुषः एकवचनम् प्र+सद् ४. नम् लृट् प्रथमपुरुषः एकवचनम्

५. अस् लट् प्रथमपुरुषः द्विवचनम् ६. पूर्वकालवाचक-अव्ययम् - नि+पा

------------